संस्कृत-वार्ता:
25.04.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- भारतेन श्व: भविष्यमाणाय लोकसभानिर्वाचनस्य द्वितीय-चरणाय सर्वा: सज्जता: सम्पूरिता:। एतस्मिन् द्वितीय-चरणे अष्टाशीति-लोकसभा-सनेभ्य: त्रयोदशराज्येषु केन्द्रशासितप्रदेशेषु अपि मतदानं भविष्यति।
- लोकसभा-निर्वाचनस्य चतुर्थ-चरणाय नामांकन-पूरण-प्रक्रिया समाप्ता जाता।
- निर्वाचनायोगेन भाजपा-कांग्रेस-दलयो: कृते आदर्श-आचार-संहिताया: उल्लघनं अभिलक्ष्य एका अधिसूचना प्रख्यापिता। अस्य मासस्य नवविंशति: दिनांकं यावत् पूर्वाह्ने एकादशवादनं यावत् प्रत्युत्तरमपि अभियाचितम्।
- अमरीकादेशीय: राष्ट्रपति: जो.बाइडेन: टिकटॉक इत्यस्य अनुप्रयोगस्य प्रतिबन्धकरणे एकस्मिन् विधेयके हस्ताक्षरं कृतवान्।
- आगामि-पञ्चदिवसेषु पूर्वीय-दक्षिणीय-प्रायद्वीपीय-भारते ग्रीष्मलहर्य्या: संभावना प्रकटिता भारत-ऋतु-विज्ञान-विभागेन।
- आई.पी.एल्. क्रिकेट् प्रतिस्पर्धायां अद्य सायं सनराइजर्स-हैदराबाद-दलस्य प्रतिस्पर्धा रॉयल-चैलेन्जर्स-बेंगलुरूदलेन सह भविष्यति।

<u>प्रचाराभियानानि</u>

श्व: भविष्यमाणाय लोकसभानिर्वाचनस्य द्वितीय-चरणाय सर्वा: सज्जता: सम्पूरिता:। एतस्मै प्रचाराभियानं ह्य: सम्पन्नं जातम्। एतस्मिन् द्वितीय-चरणे अष्टाशीति-लोकसभा-सनेभ्य: त्रयोदशराज्येषु केन्द्रशासितप्रदेशेषु अपि मतदानं भविष्यति। अपि च बाह्य-मणिपुर-लोकसभाक्षेत्राय अपि अस्मिन्नेव चरणे मतदानं भविष्यति। केरलस्य विंशति: आसनानि, कर्णाटकस्य चतुर्दशासनानि, राजस्थानस्य त्रयोदशासनानि, उत्तरप्रदेश- महाराष्ट्रयोः अष्टासनानि, मध्यप्रदेशस्य षडासनानि, असमस्य पञ्चासनानि, बिहारस्यापि पञ्चासनानि, पश्चिमबंगालस्य त्रीणि आसनानि, छत्तीसगढस्यापि त्रीणि आसनानि, त्रिपुरा-जम्मूकश्मीरयो: एकं-एकं आसनं समेत्य द्वितीयचरणे मतदानानि भविष्यन्ति। अवधेयं वर्तते यत् मध्यप्रदेशस्य बैतुल-संसदीय-आसने बसपाप्रत्याशिन: निधन कारणात् द्वितीयचरणे भविष्यमाणं निर्वाचनं साम्प्रतं तृतीये चरणे भविष्यति।

लोकसभा-निर्वाचन – चौथा चरण

लोकसभा-निर्वाचनस्य चतुर्थ-चरणाय नामांकन-पूरण-प्रक्रिया अद्य समाप्ता जाता। नामांकन-पत्राणां अनुसन्धेयकार्यं श्व: भविष्यति। प्रत्याशिन: अप्रैल-मासस्य नवविंशति: दिनांक-पर्यन्तं स्वस्य नामांकन-प्रत्यावर्तनं कर्तुं शक्नुवन्ति। अस्मिन् चरणे मई-मासस्य त्रयोदश दिनांके नव-राज्येषु एकस्मिन् केन्द्रशासितप्रदेशे च षण्णवति: आसनेभ्य: मतदानं भविष्यति। अस्मिन् चरणे उत्तर-प्रदेश-मध्यप्रदेश-महाराष्ट्र-बिहार-झारखण्ड-ओडिसा - पश्चिम-बंगाल - आन्ध्रप्रदेश - तेलंगाना - जम्मू-कश्मीर – राज्येषु मतदानं भविष्यति।

निर्वाचनायोग-अभिशंका

भारतीय-निर्वाचन-आयोगेन भाजपा-कांग्रेस-दलयो: शीर्ष-प्रचारकै: कथित-आदर्श-आचार-संहिताया: उल्लघनं अभिज्ञातम्। निर्वाचनायोगेन भाजपा-दलाध्यक्षाय जगत्प्रकाशनड्डा इत्यस्मै कांग्रेसदलाध्यक्षाय मल्लिकार्जुन-खरगे-इत्यस्मै च पत्रं विलिख्य अस्य मासस्य नवविंशति: दिनांकं यावत् पूर्वाह्ने एकादशवादनं यावत् प्रत्युत्तरं अभ्यर्थितम्। एतिस्मन् पत्रे आयोगेन निर्दिष्टं यत् सर्वे: मुख्यप्रचारका: राजनीतिक-संवादस्य उच्चमानं स्थापयन्तु अपि च आदर्श-आचार-संहिताया: प्रावधानानि अपि अनुपालयन्तु। कांग्रेस-सी.पी.आई., सी.पी.आई.एम्.दलै: स्वीय-परिवेदनासु श्रीमोदिन: राजस्थानस्य बांसवाड़ा-क्षेत्रे प्रदत्ते नैर्वाचनिक-अभिभाषणे आपत्ति: अभिव्यक्ता। तत्रैव भाजपेतिदलेन स्वीय-परिवेदनायां कांग्रेसनेतु: राहुल-गान्धिन: केरलस्य कोट्टायम-स्थले सम्भाषिते भाषणे आपत्ति: प्रकटिता।

भारतीय-ऋतु-विभाग

भारत-ऋतु-विज्ञान-विभागेन ग्रीष्मलहर्य्या: पूर्वानुमान: कृत:। आगामि-पञ्चदिवसेषु पूर्वीय-दक्षिणी प्रायद्वीपीय-भारते ग्रीष्मलहर्य्या: संभावना वर्तते। बिहार-झारखण्ड-आन्ध्रप्रदेश-तेलंगाना पूर्वोत्तर प्रदेशेषु-ग्रीष्मलहर्य्या: सम्भावना वर्तते। भारतीय-ऋतु-विभागेन इदमपि प्रोक्तं यत् मध्य-पूर्वीय भारते अधिकतमं तापमानं द्वित: त्रीणि डिग्रीमितं यावत् वर्धिष्यते। आकाशवाण्या: सह वार्तालापं कुर्वन् भारतीय-ऋतु-विभागस्य वैज्ञानिक: आर.के.जेनामणि: अवदत् यत् तटीय ओडिसा-गंगीय-पश्चिम-बंगाल-बिहार राज्येषु ग्रीष्मलहर्य्या: स्थितिं एवमेव भवितुं शक्नोति।

टिकटॉक-अनुप्रयोग:

अमरीकादेशीय: राष्ट्रपति: जो.बाइडेन: टिकटॉक इत्यस्य अनुप्रयोगस्य प्रतिबन्धकरणे एकस्मिन् विधेयके हस्ताक्षरं कृतवान्। चीनदेशस्य उद्यमाय बाइटडांस इत्यस्मै टिकटॉक-अनुप्रयोग: अमरीकादेशे प्रतिबन्धनाय उत वा अमरीकीय-उद्यमाय विक्रयणाय च नवमासानां काल: प्रदत्त:। एतादृशी अभिशंका आसीत् यत् टिकटॉक इति अनुप्रयोग: चीनदेशीयेभ्य: अधिकारिभ्य: दत्तांशान् प्रेषितुं शक्नोति। अमरीकीय सीनेटाख्येन ह्य: एतस्मै ऐतिहासिक-विधेयकाय अनुमति: प्रदत्ता। टिकटॉक इति अनुप्रयोगेन एष: विधि: असंवैधानिक: उद्घोषित:। उक्तं च यत् न्यायालये तत्सम्बद्धस्य प्रकरणस्य वादश्रवणं भविष्यति।

प्रधानमन्त्री-मध्यप्रदेश-राजवीर मृत्यु:

राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीप-धनखड: च उत्तरप्रदेशस्य हाथरस-लोकसभा-क्षेत्रात् भाजपादलस्य सांसदस्य च राजवीरसिंह-दिलेरस्य दिवंगते सति शोकम् अभिव्यक्तवन्तौ। राष्ट्रपति: स्वकीये शोकसन्देशे अवदत् यत् उत्तरप्रदेशजनानां विकासाय निरन्तरं स: कार्यं कृतमासीत्। उपराष्ट्रपति: श्रीधनखड: प्रोक्तवान् यत् दिलेर: लोकतान्त्रिक-मूल्यानि प्रति प्रतिबद्धं अपि च जनकल्याणाय  नि:स्वार्थरूपेण कार्यं कृतम्। प्रधानमन्त्री नरेन्द्रमोदी अपि तस्य निधने गंभीरां संवेदनां प्रकटितवान्। अवधेयं वर्तते यत् श्रीराजवीरसिंह दिलेरस्य ह्य: हृदयाघातेन मृत्यु: जाता।  एष: पञ्चषष्टि: वर्षीय: आसीत्।

अजीतडोभाल:

राष्ट्रिय-सुरक्षा-परामर्शद: अजीतडोभाल: सबलं प्रत्यपादयत् यत् भारतदेश: आतंकीय-अनुदानस्य विरोधार्थं आतंकवादि-अपराधिभि: सूचना-सञ्चार: प्रौद्योगिक्यो: दुरुपयोगं रोद्धुं सहयोग: प्रचलति एव। श्रीडोभाल: रूसस्य सेण्ट-पीटर्सबर्ग नगरे सुरक्षा-विषयक-प्रकरणेभ्य: नियोजितस्य उच्चस्तरीयस्य अधिकारिणां द्वादश-अन्ताराष्ट्रिय-उपवेशने वक्तव्यमिदं कथितवान्।

आई.पी.एल्.

आई.पी.एल्. इत्यस्यां क्रिकेट्-प्रतिस्पर्धायां ह्य: रात्रौ जातायां स्पर्धायां दिल्ल्या: अरुण-जेटली-क्रीडांगणे डेल्ही-कैपिटल्सदलेन गुजरात-टाइटन्सदलं चतुर्भि: धावनांकै: पराजितम्। अद्य हैदराबादनगरे राजीव-गांधी-अन्ताराष्ट्रिय-क्रीडांगणे सनराइजर्स हैदराबाद दलस्य प्रतिस्पर्धा रॉयल-चैलेन्जर्स-बेंगलुरूदलेन सह भविष्यति।

।। इति वार्ता: ।।